# Shri Lakshminrisimhamalamantrah

# શ્રીલક્ષ્મીનૃસિંહમાલામન્ત્રઃ ૩

## Document Information

Text title : Shri Lakshminrisimhamalamantrah

File name : lakShmInRRisiMhamAlAmantraH3.itx

Category : vishhnu, dashAvatAra, lakShmI, mAlAmantra, mantra, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહમાલામન્ત્રઃ ૩

ૐ અસ્ય શ્રીલક્ષ્મીનૃસિંહમાલામન્ત્રસ્ય । અજપાઋષિઃ ।
અનુષ્ટુપચ્છન્દઃ । શ્રીલક્ષ્મીનૃસિંહો દેવતા ।
ૐ ક્લાં બીજમ્ । ૐ ક્લીં શક્તિઃ । ૐ ક્લૂં કીલકમ્ ।
શ્રીલક્ષ્મીનૃસિંહકૃપાપ્રસાદસિધ્યર્થે જપે વિનિયોગઃ ।
અથ કરન્યાસઃ -
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય તર્જનીભ્યાં નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય મધ્યમાભ્યાં નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય હિરણ્યકશ્યપુર્વક્ષસ્થલચ્છેદનાય અનામિકાભ્યાં નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય અન્ત્રમાલા વિભૂષકાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય સર્વતો માં રક્ષ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
અથ હૃદ્યાદિન્યાસઃ -
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય હૃદયાય નમઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય શિરસે સ્વાહા ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય શિખાયૈ વષટ્ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય હિરણ્યકશ્યપુર્વક્ષસ્થલચ્છેદનાય કવચાય હુમ્ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય અન્ત્રમાલા વિભૂષકાય નેત્રત્રયાય વૌષટ્ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય સર્વતો માં રક્ષ અસ્ત્રાય ફટ્ ।
અથ દિગ્બન્ધનઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે અઘોરનારસિંહાય પૂર્વદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે રૌદ્રનારસિંહાય દક્ષિણદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે વિદારણનારસિંહાય પશ્ચિમદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે જ્વાલાનારસિંહાય ઉત્તરદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે સુદર્શનનારસિંહાય આકાશદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે વિદારણનારસિંહાય અન્તરિક્ષદિશં બન્ધ બન્ધ ।

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવત લક્ષ્મીનારસિંહાય પાતાલદિશં બન્ધ બન્ધ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે અહોનારસિંહાય સકલદિશં બન્ધ બન્ધ ।
ઇતિ દિગ્બન્ધઃ ।
અથ ધ્યાનમ્ ।
ઊર્ધ્વાભ્યાં ચાન્ત્રમાલાં તદનુદરમરિં ખેટખડ્ગં ચ બિભ્રન્
બાણં ચાપે કરાભ્યાં કમલમપિ ગદાં પાશમપ્યઙ્કુશં ચ ।
ઊર્વૌ નિક્ષિપ્ય દૈત્યં તદુદરકુહરં દારયન્તં ચ દૌર્ભ્યાં
રક્તજ્વાલાવમન્તં જ્વરસમરભયે ચિન્તયેદુગ્રસિંહમ્ ॥ ૧॥

માનસોપચારૈઃ સમ્પૂજ્ય ।
ૐ લં પૃથિવ્યાત્મકં ગન્ધં પરિકલ્પયામિ ।
ૐ હં આકાશાત્મકં પુષ્પં પરિકલ્પયામિ ।
ૐ યં વાયવાત્મકં ધૂપં પરિકલ્પયામિ ।
ૐ રં વહન્યાત્મકં દીપં પરિકલ્પયામિ ।
ૐ વં અમૃતાત્મકં નૈવેદ્યં પરિકલ્પયામિ ।
ૐ સં સર્વાત્મકં સર્વોપચારાન્ પરિકલ્પયામિ । ઇતિ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય વજ્રનખાય વિદ્મહે
તીક્ષ્ણદંષ્ટ્રાય ધીમહી તન્નો નારસિંહઃ પ્રચોદયાત્ ।
અથ મન્ત્રઃ ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય જ્વાલામુખાગ્નિનેત્રાય શઙ્ખચક્રગદાધરાય વરદાભયહસ્તાય વરપ્રદાય વામાઙ્કસ્થિતરમાસહિતાય હિરણ્યકશિપુવક્ષસ્થલચ્છેદનાય અન્ત્રમાલા વિભૂષણાય સર્વતો માં રક્ષ રક્ષ મમ શત્રૂન્ હન હન દહ દહ પચ પચ કુલિ કુલિ (હૂં ફટ્ સ્વાહા) ઉચ્ચાટણાય નમઃ સ્વાહા ॥ ૧॥

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય કહ કહ કમ્પય કમ્પય અવતારય અવતારય ઉચ્ચાટનાય નમઃ સ્વાહા ॥ ૨॥

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય નવકોટિગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય અષ્ટકોટિગન્ધર્વગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય સપ્તકોટિશાકિનીગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય ષટ્કોટિડાકિનીગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય પઞ્ચકોટિવરુણગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય ચતુષ્કોટિબ્રહ્મરાક્ષસગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય ત્રિકોટિરાજગ્રહોચ્ચાટનાય ।
ૐ ભૂર્ભવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય દ્વિકોટિશત્રુગ્રહોચ્ચાટનાય ।)

ૐ ભૂર્ભરસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય એકકોટિચોરરાક્ષસપ્રહોચ્ચાટનાય ॥ ૩॥

ૐ ભૂર્ભવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય કાલાગ્નિરુદ્રાય ભટ ભટ ભગ ભગ વીરાન્તક ઘોરનારસિંહ ઘોરાન્તકૈકાન્તક્રૂરનારસિંહાય સહસ્રભુજશઙ્ખચક્રગદાધરાય નખશિખદુષ્ટરાક્ષસસંહારકાય દુરિતવિદારણાય પ્રલયકાલાય નારસિંહાય બ્રૂં બ્રૂં હ્રાં હ્રીં કૂષ્માણ્ડદુર્જનદુષ્ટમ્લેચ્છાદિનિબન્ધનાય શાકિનીડાકિનીવેતાલાપસ્મારગ્રહગન્ધર્વગ્રહનાગગ્રહકામિનીગ્રહચણ્ડિગ્રહપાપગ્રહસમ્પુટસર્વગ્રહોચ્ચાટનાય નવનારસિંહાય (હું ફટ્ સ્વાહા) ઉચ્ચાટનાય નમઃ સ્વાહા ॥ ૪॥

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય રૌદ્રજ્વાલાપ્રજ્વલિતનેત્રત્રયાય પ્રલયકાલાગ્નિરુદ્રાવતારાય વિશ્વરૂપાય સ્તમ્ભોદ્ભવાય અનન્તદિવ્યાયુધધરાય દાનવકુલસંહારકાય રક્તરઞ્જિત મૂર્ધજ ધગ ધગ ભગ ભગ ભોભૂમન્બ્રહ્માણ્ડભયઙ્કુરતાણ્ડવનારસિંહ શ્રીકેશવદેવરૂપ દશવૃન્દાવર એકાદશરુદ્રદ્વાદશભાનુતેજજ્વાલાનારસિંહ મમ ગુરુ પ્રસાદય પ્રસાદય સર્વરાક્ષસાન્ દાહય દાહય ભક્ષય ભક્ષય મારય મારય મર્દય મર્દય તાપય તાપય દીપય દીપય વિદારય વિદારય સ્તમ્ભય સ્તમ્ભય મોહય મોહય વિભ્રામય વિભ્રામય ઉચ્ચાટય ઉચ્ચાટય હન હન પચ પચ સંહારય સંહારય ઉચ્ચાટનાય નમઃ સ્વાહા ॥ ૫॥

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય ભૂતમણ્ડલભૈરવમણ્ડલકૂષ્માણ્ડમણ્ડલય ક્ષમણ્ડલાનિ કમ્પય કમ્પય આવેશય આવેશય આકર્ષય આકર્ષય આનન્દય આનન્દય નૃત્યય નૃત્યય વદ વદ ઉચ્ચાટનાય નમઃ સ્વાહા ॥ ૬॥

ૐ ભૂર્ભુવસ્વઃ ૐ ક્ષ્રૌં નમો ભગવતે નારસિંહાય હિરણ્યાક્ષવક્ષોવિદારણાય જય જય એહિ એહિ ભગવન્ ગરુડધ્વજ મમ સર્વોપદ્રવાન્ વજ્રદેહેન ચૂર્ણય ચૂર્ણય મુદ્રાભરણહરણાય સમુદ્રં શોષય શોષય અસુરગન્ધર્વયક્ષપિશાચબ્રહ્મરાક્ષસભૂતપ્રેતપિશાચાન્ વિધ્વંસય વિધ્વંસય પૂર્વાપરશૂલમૂલપાતિનં પ્રતિસ્તમ્ભય પ્રતિસ્તમ્ભય પરમન્ત્ર પરયન્ત્ર પરતન્ત્રાણિ છિન્દિ છિન્દિ ભિદિ ભિદિ અયમારિ વિનિવારિ અપમૃત્યુભયસકલસઙ્કુટાન્ વિધ્વંસય વિધ્વંસય હન હન પચ પચ રક્ષ રક્ષ અહોનારસિંહાય અન્તકાન્તકાય ઉચ્ચાટનાય નમઃ સ્વાહા ॥ ૭॥

ૐ ક્ષ્રૌમ્ ।

ફલશ્રુતિઃ ।

સિદ્ધિં નવદિનૈશ્ચૈવ જપં કુર્યાન્નરોત્તમઃ ।
અયુતં તુ જપં કર્તું સિદ્ધિસ્તુ જાયતે ધ્રુવમ્ ॥ ૧॥

હવનં તુ દશાંશેન કુર્યાત્તર્પણમેવ ચ ।
બ્રાહ્મણાન્ ભોજયેચ્ચૈવ દશાંશેનાપ્યનુક્રમાત્ ॥ ૨॥

સિદ્ધિર્ભવતિ રાજેન્દ્ર એકચિત્તેન તેજસા ।
એકાન્નં ભોજનં કાર્યં ભૂમિશાયિ ન મઞ્ચકે ॥ ૩॥

જિતેન્દ્રિયો વા પુરુષો યાવત્ સામાસિકં ભવેત્ ।
અથવા મણ્ડલં કાર્યં જપમાવર્તયેત્શતમ્ ॥ ૪॥

અથર્વણેષુ વેદેષુ ઋષીણાં ચ શતં પુરા ।
ન હિ લોકેષુ વિખ્યાતં રાજન્ સર્વભયાપહમ્ ॥ ૫॥

ભૂતપ્રેતપિશાચાંશ્ચ યક્ષગન્ધર્વરાક્ષસાન્ ।
દસ્યુવ્યાઘ્રરણે રાજન્ કાનનેઽપિ જલેઽપિ વા ॥ ૬॥

સર્વરક્ષાકરં સ્તોત્રં હરેસ્તુ પ્રીતિકારકમ્ ।
ઇદં તુ પઠિતં રાજન્ સર્વકામાન્ અવાપ્નુયાત્ ॥ ૭॥

પરમન્ત્રાણિ તન્ત્રાણિ જારણં મારણાદિકમ્ ।
ઉચ્ચાટનેષુ રાજેન્દ્ર સ્તમ્ભનેષુ ભવિષ્યતિ ॥ ૮॥ ।
હરેસ્તુ પ્રતિમાં સ્થાપ્ય નિત્યપૂજાં ચ કારયેત્ ।
સ્થાપયેદ્દેવદેવેશં જપં કૃત્વા યથાવિધિ ॥ ૯॥

આદૌ ચ શતગાયત્ર્યા જપેનૈવ નરોત્તમઃ ।
(નૃસિંહગાયત્રી) હવનં પાયસાન્નેન કુર્યાદ્બલિં યથાવિધિ ॥ ૧૦॥

સિદ્ધિર્ભવતિ રાજેન્દ્ર કુર્યાદુક્તવિધાનતઃ ।
ઇદં રહસ્યં પરમં નાખ્યાતં ભુવિ ભૂમિપ ॥ ૧૧॥

અથર્વણેષુ વેદેષુ આખ્યાતં ઋષિણા મયા ।
પુરાચીર્ણેન વ્યાસેન કથિતં નારદાય વૈ ॥ ૧૨॥

તેન દત્તં તુ માં રાજન્ સર્વલોકોપકારકમ્ ।
એતચ્ચ તે મયાખ્યાતં ત્વં હિ રાજ્યમવાપ્સ્યસિ ॥ ૧૩॥

ઇત્યથર્વણરહસ્યે શ્રીલક્ષ્મીનૃસિંહમાલામન્ત્રં સમ્પૂર્ણમ્ ।
શ્રીલક્ષ્મીનૃસિંહાર્પણમસ્તુ ।

Proofread by M K Barman

---

*Shri Lakshminrisimhamalamantrah*

pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*